# Code No. 5561

*Roll No.* ..............................

*SET : B*

# D. El. Ed. 2nd Year Exam., January – 2022
## (Admn. Year 2019)

## Pedagogy of Sanskrit Language

## संस्कृत भाषा का शिक्षाशास्त्र

## (Course Code : DE-211)

(Only for Re-appear Candidates)

**[ Evening Session ]**

*Time : 2 Hours ]* *[ Max. Marks : 35*

*समय : 2 घण्टे ]* *[ अधिकतम अंक : 35*

---

*सामान्य निर्देश :*

*(i)* *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 6 हैं।*

*(ii)* *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*

*(iii)* *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*

*(iv)* *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*

*(v) उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*

*(vi) परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*

*(vii) कृपया प्रश्नों का उत्तर देने से पूर्व सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई दावा स्वीकार नहीं किया जायेगा।***

*सामान्य निर्देशाः –*

*(क)* ***सर्वे*** *प्रश्नाः* ***अनिवार्याः*** *सन्ति।*

*(ख) लेखः सुस्पष्टः सुवाच्यः च भवेत्।*

*(ग) प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् देयानि।*

*(घ) प्रश्नानाम् संख्या अवश्यमेव लेखनीया।*

## भाग - क

**1.** अधोलिखितेषु प्रश्नेषु कयोरपि ***द्वयोः*** प्रश्नयोः व्याख्या कार्या –2 × 3 = 6

(क) वर्तमानसमये माध्यमिककक्षासु संस्कृतभाषायाः, अस्याः साहित्यशिक्षणस्य च अनिवार्यतोपरि संक्षिप्तरूपेण एकं लेखं लिखत।

(ख) संस्कृतगद्यशिक्षणस्य सोपानानां वर्णनं कुरुत।

(ग) पाठयोजनायाः सोपानानां वर्णनं कुरुत।

**2.** व्याकरणशिक्षणस्य विधीनां वर्णनं कुर्वन् एतेषां विधीनां दोषाम् अपि लिखत। 3

**अथवा**

बहव्रीहिः समासस्य सोदाहरणं व्याख्या कार्या।

**3.** शैक्षिकमूल्यांकनस्य ये ये प्रचलिताः विधयः सन्ति तेषाम् संक्षिप्तरूपेण वर्णनं कुरुत। 3

**अथवा**

संस्कृतशिक्षणे मूल्यांकनस्य प्रमुखसाधनानां वर्णनं कुरुत।

**4.** पाठयोजनायाः यानि प्रचलितानि सोपानानि, तेषां व्याख्या कार्या। 3

**अथवा**

सोदाहरणदृष्टान्तकौशलस्य प्रमुखघटकानां वर्णनं कुरुत।

**5.** वर्तमानकाले व्याकरणशिक्षणस्य का व्यवस्था अस्ति ? अस्मिन् सन्दर्भे अस्य सोपानानां व्याख्या कार्या। 5

**अथवा**

कारकेन कोऽभिप्रायः ? अस्य भेदान् सोदाहरणं लिखत।

## भाग - ख

**6.** वस्तुनिष्ठप्रश्नानाम् उत्तराणि देयानि – $15 \times 1 = 15$

(क) अधोलिखितं श्लोकं पठित्वा उचितम् उत्तरं लिखत यत् – 'निद्रया केषां कालो गच्छति' ?

*काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।*
*व्यसनेन तु मूर्खाणां, निद्रया कलहेन वा।।*

(i) धीमताम् (ii) मूर्खाणाम्

(iii) कवीनाम् (iv) केषामपि न

(ख) विश्वनाथस्य काव्यलक्षणम् अस्ति –

(i) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि

(ii) काव्यस्यात्मा ध्वनिः

(iii) वाक्यं रसात्मकं काव्यम्

(iv) एषु किमपि न

(ग) डॉ० सुनीतिकुमार चटर्जी प्रथमोऽध्यक्षः आसीत् –

(i) प्रथमशिक्षायोगस्य (ii) प्रथमवित्तायोगस्य

(iii) प्रथमसंस्कृतायोगस्य (iv) कस्यापि न

(घ) 'गद्यं कवीनां निकषं वदन्ति' पंक्तिरियं केन सम्बद्धास्ति ?

(i) पद्येन (ii) चम्पूकाव्येन

(iii) गद्येन (iv) केनापि न

(ङ) 'पाणिपादम्' इत्यस्मिन् समस्तपदे कः समासोऽस्ति ?

(i) द्वन्द्वसमासः (ii) बहुव्रीहिसमासः

(iii) अव्ययीभावः (iv) तत्पुरुषः

(च) संस्कृतभाषायाम् कति उपसर्गाः सन्ति ?

(i) 21 (ii) 22

(iii) 23 (iv) 24

(छ) आदर्शप्रश्नपत्रस्य रूपरेखायां सम्मिलितोऽस्ति –

(i) बोधक्षमता (ii) ज्ञानम्

(iii) उद्देश्यम् (iv) उपर्युक्ताः सर्वे

(ज) आदर्शप्रश्नपत्रस्य गुणेषु सम्मिलितो ***नास्ति*** –

(i) प्रश्नपत्रस्य व्यावहारिकता

(ii) प्रश्नपत्रस्य काठिन्यम्

(iii) प्रश्नपत्रस्य विश्वसनीयता

(iv) प्रश्नपत्रस्य व्यापकता

(झ) मूल्यांकननिर्देशाः आवश्यकाः सन्ति –

(i) परीक्षकेभ्यः

(ii) विद्यार्थिभ्यः

(iii) प्रश्नपत्रनिर्मातृभ्यः

(iv) केभ्योऽपि न

(ञ) लिखितपरीक्षातः सम्बद्धा ***नैव*** सन्ति –

(i) मौखिकप्रश्नाः

(ii) निबन्धात्मकप्रश्नाः

(iii) वस्तुनिष्ठप्रश्नाः

(iv) लघूत्तरात्मकप्रश्नाः

(ट) शास्त्रार्थविधिः सम्बद्धोऽस्ति –


(i) वर्तमानमूल्यांकनविधेः

(ii) प्रश्नपत्रनिर्माणविधेः

(iii) प्राचीनमूल्यांकनविधेः

(iv) कस्मादपि न

(ठ) अधोलिखितं चक्रं केन सम्बद्धमस्ति ?




(i) सूक्ष्मशिक्षणेन

(ii) प्रश्नपत्रनिर्माणेन

(iii) पाठयोजनया

(iv) केनापि न

(ड) पाठयोजनायाः सोपानमस्ति –

(i) उद्देश्यम्  (ii) पूर्वज्ञानम्

(iii) प्रस्तुतीकरणम्  (iv) उपर्युक्ताः सर्वे

(ढ) पाठयोजनायाः कति विधिः अस्ति ?

(i) पञ्च (ii) चत्वारः

(iii) त्रयः (iv) द्वौ

(ण) 'क्रियान्वयित्वं …………..' रिक्तस्थानं पूरयत –

(i) धातुः (ii) परस्मैपदम्

(iii) समासः (iv) कारकत्वम्